## परिसरे सञ्जातं वृक्षारोपणम्




योगदिवसानन्तरं परिसरस्य नवनिदेशकेन, समागतातिथिना प्रो. अरिन्दम् चक्रवर्तिमहोदयेन च परिसरे वृक्षारोपणं कृतम्। योगदिवसावसरे अनेके वृक्षाः परिसरेण आनीता आसन्। अतस्तेषां समेषां रोपणं भवेदितिधिया परिसरनिदेशकेन प्रो.एम.चन्द्रशेखरमहोदयेन सर्वैः प्राध्यापकैः सह कार्यक्रमोऽयमायोजितः। अस्मिन् अवसरे निदेशकमहोदयेन वृक्षाणां महत्त्वं तत्र प्रतिपादितम्। तैरुक्तं यत् वृक्षं विना अस्माकं जीवनं नैव भवितुमर्हति। अतः वृक्षाणां सुरक्षा स्वजीवनस्य रक्षा इति अस्माभिः ज्ञातव्यम्। प्रो.अरविन्दम् चक्रवर्तिनापि स्वविचाराः अस्मिन् विषये प्रस्तुता। तैरुक्तं यत् मानवस्य जीवनं तावत् सुखपूर्वकमस्ति यावत् पर्यन्तं वृक्षाणां रक्षा भविष्यति। तदभावे वयमपि नष्टाः भविष्यामः। अवसरेऽस्मिन् डॉ.सच्चिदानन्दस्नेही-डॉ.अनिलकुमार-डॉ.-शैलेन्द्रप्रसादउनियाल-श्रीनवीनडोबरियाल- श्रीपङ्कजकोटियाल- स्वप्निलपाण्डे- इत्यादयः प्राध्यापकाः कर्मचारिणश्चोपस्थिता आसन।